# mahAnyAsam

# महान्यासम्

## Document Information

Text title : Mahanyasam

File name : mahAnyAsam.itx

Category : veda

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Vaidya Sundaram

Proofread by : Vaidya Sundaram

Latest update : January 28, 2003, March 20, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 20, 2025

*sanskritdocuments.org*

mahAnyAsam

# महान्यासम्

श्री गुरुभ्यो नमः । हरिः ॐ

अथ पंचांगरुद्राणां न्यासपूर्वकं
जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः

नमस्ते रुद्र मन्यव उतोत इषवे नमः ।
नमस्ते अस्तु धन्वने बाहुभ्यामुत ते नमः ॥

या त इषुः शिवतमा शिवम् बभूव ते धनुः ।
शिवा शरव्या या तव तया नो रुद्र मृडय ।

कं खं गं घं ङम् । यरलवशषसहोम् ।
ॐ नमो भगवते रुद्राय । पूर्वांग रुद्राय नमः ॥

अपैतु मृत्युरमृतन्न आगन्वैवस्वतो नो अभयं कृणोतु ।
पर्णं वनस्पतेरिवाभिनश्शीयताꣳ रयिस्स चतान्नः शचीपतिः

चं छं जं झं ञम् । यरलवशषसहोम् ।
ॐ नमो भगवते रुद्राय ।
दक्षिणांग रुद्राय नमः ॥

निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः ।
ऊर्ध्वलिंगाय नमः । हिरण्याय नमः । हिरण्यलिंगाय नमः ।
सुवर्णाय नमः । सुवर्णलिंगाय नमः । दिव्याय नमः ।
दिव्यलिंगाय नमः । भवाय नमः । भवलिंगाय नमः ।
शर्वाय नमः । शर्वलिंगाय नमः । शिवाय नमः ।
शिवलिंगाय नमः । ज्वलाय नमः । ज्वललिंगाय नमः ।
आत्माय नमः । आत्मलिंगाय नमः । परमाय नमः ।
परमलिंगाय नमः । एतत्सोमस्य सूर्यस्य

सर्वलिंगं स्थापयति पाणिमन्त्रं पवित्रम् ॥

टं ठं डं ढं णम् । यरलवशषसहोम् ।
ॐ नमो भगवते रुद्राय । पश्चिमांग रुद्राय नमः ॥

यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो
विश्वा भुवनाऽविवेश तस्मै रुद्राय नमो अस्तु ॥

तं थं दं धं नम् । यरलवशषसहोम् ।
ॐ नमो भगवते रुद्राय । उत्तरांग रुद्राय नमः ॥

प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः ।
तेनान्नेनाप्यायस्व ॥ ६ ॥

नमो रुद्राय विष्णवे मृत्युर्मे पाहि ॥

पं फं बं भं मम् । यरलवशषसहोम् ।
ॐ नमो भगवते रुद्राय । ऊर्ध्वांग रुद्राय नमः ॥

॥ इति पंचांगरुद्रन्यासः ॥

---

तत्पुरुषाय विद्महे महादेवाय धीमहि ।
तन्नो रुद्रः प्रचोदयात् ॥

संवर्ताग्नितटित्प्रदीप्तकनकप्रस्पर्धि तेजोऽरुणं
गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ।
अर्धेन्दुद्युतिलोलपिंगल जटा भारप्रबोद्धोदकं
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥

ॐ नमो भगवते रुद्राय । पूर्वांग मुखाय नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

कालाभ्रभ्रमरांजनद्युतिनिभं व्यावृत्तपिंगेक्षणं
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्रांकुरम् ।
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णताशेखरं
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥

ॐ नमो भगवते रुद्राय । दक्षिणांग मुखाय नमः ॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

प्रालेयाचलमिन्दुकुन्दधवलं गोक्षीरफेनप्रभं
भस्माभ्यंगमनंगदेहदहनज्वालावलीलोचनम् ।
विष्णुब्रह्ममरुद्गणार्चितपदं ऋग्वेदनादोदयं
वन्देऽहं सकलं कलंकरहितं स्थाणोर्मुखं पश्चिमम् ॥

ॐ नमो भगवते रुद्राय । पश्चिमांग मुखाय नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलविकरणाय नमो बलाय नमो
बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः

गौरं कुंकुम पंकितं सुतिलकं व्यापाण्डुमण्डस्थलं
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ।
स्निग्धं बिम्बफलाधरं प्रहसितं नीलालकालंकृतं
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ॥

ॐ नमो भगवते रुद्राय । उत्तरांग मुखाय नमः ॥

ईशानस्सर्वविद्यानामीश्वरः सर्व भूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्वाधिकं
तस्मादुत्तरतत्वमक्षरमिति ध्येयं सदा योगिभिः ।
ओंकारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मं परं
वन्दे पंचममीश्वरस्य वदनं खव्यापि तेजोमयम् ॥

ॐ नमो भगवते रुद्राय । ऊर्ध्वांग मुखाय नमः ॥

॥ महान्यास मन्त्रपाठ प्रारम्भः ॥

केशादिपादान्तन्यासः

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि ॥

शिखायै नमः ॥

अ॒स्मिन् म॑ह॒त्य॑र्ण॒वे᳚ऽन्तरि॑क्षे भ॒वा अधि॑ ॥
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ शिरसे नमः ॥
स॒हस्रा॑णि सहस्र॒शो ये रु॒द्रा अधि॒ भूम्या᳚म् ।
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ ललाटाय नमः ॥

ह॒ꣳ॒सश्शु॑चि॒षद्वसु॑रन्तरिक्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत् ।
नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत् ॥

भ्रुवोर्मध्याय नमः ॥

त्र्यं॑बकं यजामहे सु॒गन्धिं॑ पुष्टि॒वर्ध॑नम् ।
उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ मामृता᳚त् ॥ नेत्राभ्यां नमः ॥

नमः॑ स्रु॒त्या॑य च॒ पथ्या॑य च॒ नमः॑ का॒ट्या॑य च नी॒प्या॑य च॒
नमः॒ सूद्या॑य च सर॒स्या॑य च॒ नमो॑ ना॒द्याय॑ च वैश॒न्ताय॑ च॒ ॥

कर्णाभ्यां नमः ॥

मा न॑स्तो॒के तन॑ये॒ मा न॒ आयु॑षि॒ मा नो॒ गोषु॒ मा नो॒ अश्वे॑षु रीरिषः ।
वी॒रान्मा नो॑ रुद्र भामि॒तोऽव॑धीर्ह॒विष्म॑न्तो॒ नम॑सा विधेम ते ॥

नासिकाभ्यां नमः ॥

अ॒व॒तत्य॒ धनु॒स्त्वꣳ॒ सह॑स्राक्ष॒ शते॑षुधे ।
नि॒शीर्य॑ श॒ल्यानां॒ मुखा॑ शि॒वो नः॑ सु॒मना॑ भव ॥

मुखाय नमः ॥

नील॑ग्रीवाः शिति॒कण्ठा᳚ः श॒र्वा अ॒धः क्ष॑माच॒राः ॥
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ कण्ठाय नमः ॥
नील॑ग्रीवाः शिति॒कण्ठा॒ दिव॑ꣳ रु॒द्रा उप॑श्रिताः ॥
तेषा॑ꣳ सहस्रयोज॒नेऽव॒ धन्वा॑नि तन्मसि ॥ उपकण्ठाय नमः ॥

नम॑स्ते अ॒स्त्वायु॑धा॒याना॑तताय धृ॒ष्णवे᳚ ।
उ॒भाभ्या॑मु॒त ते॒ नमो॑ बा॒हुभ्या॑म् तव॒ धन्व॑ने ॥

बाहुभ्यां नमः ॥

या ते हेतिर्मीढुष्टम हस्ते बभूव ते धनुः ।
तयाऽस्मान् विश्वतस्त्वमयक्ष्मया परिब्भुज ॥

उपबाहुभ्यां नमः ॥

परिणो रुद्रस्य हेतिर्वृणक्तु परि त्वेषस्य दुर्मतिरघायोः ।
अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृडय ॥

मणिबन्धाभ्यां नमः ॥

ये तीर्थानि प्रचरन्ति सृकावन्तो निषङ्गिणः ॥

तेषाँ सहस्रयोजनेऽव धन्वानि तन्मसि ॥ हस्ताभ्यां नमः ॥

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥

अंगुष्ठाभ्यां नमः ॥

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलाविकरणाय नमो बलाय नमो
बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥ तर्जनीभ्यां नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥ मध्यमाभ्यां नमः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

अनामिकाभ्यां नमः ॥

ईशानस्सर्वविद्यानामीश्वरः सर्व भूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

कनिष्ठिकाभ्यां नमः ॥

नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय
उमापतये पशुपतये नमो नमः । करतलकरपृष्ठाभ्यां नमः ॥

नमो वः किरिकेभ्यो देवानाँ हृदयेभ्यः । हृदयाय नमः ॥

नमो गणेभ्यो गणपतिभ्यश्च वो नमः । पृष्ठाय नमः ॥

नमस्तक्षभ्यो रथकारेभ्यश्च वो नमः । कक्षाभ्यां नमः ॥

नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमः । पार्श्वाभ्यां नमः ॥

विज्यं धनुः कपर्दिनो विशल्यो बाणवाँ उत ।
अनेशन्नस्येषव आभुरस्य निषङ्गथिः । जठराय नमः ॥

हिरण्यगर्भस्समवर्तताग्रे भूतस्य जातः पतिरेक आसीत् ।
सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय हविषा विधेम ॥

नाभ्यै नमः ॥

मीढुष्टम शिवतम शिवो नः सुमना भव ।
परमे वृक्ष आयुधन्निधाय कृत्तिं वसान आचर पिनाकं बिभ्रदागहि ॥

कण्ठ्यै नमः ॥

ये भूतानामधिपतयो विशिखासः कपर्दिनः ।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥ गुह्याय नमः ॥

ये अन्नेषु विविध्यन्ति पात्रेषु पिबतो जनान् ।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥ अण्डाभ्यां नमः ॥

स शिरा जातवेदा अक्षरं परमं पदम् ।
वेदाना ँ शिरसि माता आयुष्मन्तं करोतु माम् ॥ अपानाय नमः ॥

मा नो महान्तमुत मा नो अर्भकं मा न उक्षन्तमुत मा न उक्षितम् ।
मा नोऽवधीः पितरं मोत मातरं प्रिया मा नस्तनुवो रुद्र रीरिषः ॥

ऊरूभ्यां नमः ॥

एष ते रुद्रभागस्तञ्जुषस्व तेनावसेन परो
मूजवतोऽतीह्यवततधन्वा पिनाकहस्तः कृत्तिवासाः ॥

जानुभ्यां नमः ॥

सँ सृष्टजित्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता ।
बृहस्पते परिदीया रथेन रक्षोहामित्राँअपबाधमानः ॥

जंघाभ्यां नमः ॥

विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् ।
सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्तु ॥ गुल्फाभ्यां नमः ॥

ये पथां पथिरक्षय ऐलबृदा यव्युधः ॥

तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥ पादाभ्यां नमः ॥

अध्यवोचदधिवक्ता प्रथमो दैव्यो भिषक् ।
अहीँश्च सर्वाञ्जम्भयन्त्सर्वाश्च यातुधान्यः ॥ कवचाय हुम् ॥

नमो बिल्मिने च कवचिने च
नमः श्रुताय च श्रुतसेनाय च ॥ उपकवचाय हुम् ॥

नमो अस्तु नीलग्रीवाय सहस्राक्षाय मीढुषे ।
अथो ये अस्य सत्वानोऽहं तेभ्योऽकरन् नमः ॥ नेत्रत्रयाय वौषट् ॥

प्रमुञ्च धन्वनस्त्वमुभयोरार्त्नियोर्ज्याम् ।
याश्च ते हस्त इषवः परा ता भगवो वप ॥ अस्त्राय फट् ॥

य एतावन्तश्च भूयाँसश्च दिशो रुद्रा वितस्थिरे ।
तेषाँसहस्रयोजनेऽव धन्वानि तन्मसि ॥ इति दिग्बन्धः ॥

॥ दशांगन्यासः ॥

ॐ नमो भगवते रुद्रायेति नमस्कारान् न्यसेत् ॥

ॐ मूर्ध्नि नमः । नं नासिकाय नमः । मों ललाटाय नमः । भं मुखाय नमः ।
गं कण्ठाय नमः । वं हृदयाय नमः । तें दक्षिण हस्ताय नमः । रुं वामहस्ताय नमः ।
द्रां नाभ्यै नमः । यं पादाभ्यां नमः ॥

॥ पंचांगन्यासः ॥

पादादिमूर्धान्त पंचांगन्यासः

सद्योजातं प्रपद्यामि सद्यो जाताय वै नमो नमः ।
भवे भवे नातिभवे भवस्व माम् । भवोद्भवाय नमः ॥ पादाभ्यां नमः

वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय नमो रुद्राय नमः
कालाय नमः कलविकरणाय नमो बलाविकरणाय नमो बलाय नमो

बलप्रमथनाय नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

ऊरूभ्यां नमः ॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

हृदयाय नमः ॥

तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

मुखाय नमः ॥

ईशानस्सर्वविद्यानामीश्वरः सर्व भूतानां
ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥

हंस हंस ॥ मूर्ध्ने नमः ॥

॥ हंसगायत्री ॥

अस्य श्री हंसगायत्री महामन्त्रस्य अव्यक्त परब्रह्म ऋषिः
अव्यक्त गायत्री छन्दः परमहंसो देवता ॥ हंसां बीजम्
हंसीं शक्तिः हंसूं कीलकम् ॥ परमहंस प्रसाद सिद्ध्यर्थे जपे विनियोगः ॥

हंसां अंगुष्ठाभ्यां नमः ॥ हंसीं तर्जनीभ्यां नमः ॥ हंसूं मध्यमाभ्यां नमः ॥

हंसैं अनामिकाभ्यां नमः ॥ हंसौं कनिष्ठिकाभ्यां नमः ॥ हंसः करतलकरपृष्ठाभ्यां नमः ॥

हंसां हृदयाय नमः ॥ हंसीं शिरसे स्वाहा ॥ हंसूं शिखायै वषट् ॥

हंसैं कवचाय हुम् ॥ हंसौं नेत्रत्रयाय वौषट् । हंसः अस्त्राय फट् ॥

भूर्भुवस्सुवरोमिति दिग्बन्धः ॥ ध्यानम् ॥ गमागमस्थं गमनादिशून्यं चिद्रूपदीपं तिमिरापहारम्
।
पश्यामि तं सर्वजनान्तरस्थं नमामि हंसं परमात्मरूपम् ॥

हंस हंसाय विद्महे परमहंसाय धीमहि । तन्नो हंसः प्रचोदयत् ॥

हंस हंसेति यो ब्रूयाद्धंसो नाम सदाशिवः ।
एवं न्यासविधिं कृत्वा ततः संपुटमारभेत् ॥

ॐ श्री गुरुभ्यो नमः । हरिः ॐ

॥ दिक् संपुटन्यासः ॥ ॥ ५॥

ॐ भूर्भुवस्सुवरों
लम् । त्रातारमिन्द्र मवितारमिन्द्रꣳ हवे हवे सुहवꣳ शूरमिन्द्रम् ।
हुवे नु शक्रं पुरुहूतमिन्द्रꣳस्वस्ति नो मघवा धात्विन्द्रः ।
लं भूर्भुवस्सुवः इन्द्राय वज्रहस्ताय सुराधिपतये ऐरावतवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
पूर्वदिग्भागे ललाटस्थाने इन्द्रः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.१॥

ॐ भूर्भुवस्सुवरों
रम् । त्वन्नो अग्ने वरुणस्य विद्वान् देवस्य हेडोऽव यासिसीष्ठाः ।
यजिष्ठो वह्नितमश्शोशुचानो विश्वा द्वेषाꣳसि प्रमुमुग्ध्यस्मत् ॥
रं भूर्भुवस्सुवः अग्नये शक्तिहस्ताय तेजोऽधिपतये अजवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
आग्नेयदिग्भागे नेत्रस्थाने अग्निः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.२॥

ॐ भूर्भुवस्सुवरों
हम् । सुगन्नः पन्थामभयं कृणोतु । यस्मिन्नक्षत्रे यम एति राजा ।
यस्मिन्नेन मभ्यषिंचन्त देवाः । तदस्य चित्रꣳ हविषा यजाम ॥
हं भूर्भुवस्सुवः यमाय दण्डहस्ताय धर्माधिपतये महिषवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
दक्षिणदिग्भागे कर्णस्थाने यमः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.३॥

ॐ भूर्भुवस्सुवरों
षम् । असुन्वन्त मयजमानमिच्छस्तेनस्येत्यान्तस्करस्यान्वेषि ।
अन्यमस्मदिच्छ सा त इत्या नमो देवि निर्ऋते तुभ्यमस्तु ॥
षं भूर्भुवस्सुवः निर्ऋतये खड्गहस्ताय रक्षोऽधिपतये नरवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
नैर्ऋतदिग्भागे मुखस्थाने निर्ऋतस्सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.४॥

ॐ भूर्भुवस्सुवरों
वम् । तत्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः ।

अहेडमानो वरुणेहबोध्युरुश२ँ स मा न आयुः प्रमोषीः ॥

वं भूर्भुवस्सुवः वरुणाय पाशहस्ताय जलाधिपतये मकरवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
पश्चिमदिग्भागे बाहुस्थाने वरुणः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.५॥

ॐ भूर्भुवस्सुवरों
यम् । आ नो नियुद्भिश्शतिनीभिरध्वरम् । सहस्रिणीभि रुपयाहि यज्ञम् ।
वायो अस्मिन् हविषि मादयस्व । यूयं पात स्वस्तिभिस्सदा नः ॥

यं भूर्भुवस्सुवः वायवे सांकुशध्वजहस्ताय प्राणाधिपतये मृगवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
वायव्यदिग्भागे नासिकस्थाने वायुः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ॥ ५.६॥

ॐ भूर्भुवस्सुवरों
सम् । वय२ँ सोम व्रते तव । मनस्तनूषुबिभ्रतः । प्रजावन्तो अशीमहि ॥

सं भूर्भुवस्सुवः सोमाय अमृतकलशहस्ताय नक्षत्राधिपतये
अश्ववाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
उत्तरदिग्भागे हृदयस्थाने सोमः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.७॥

ॐ भूर्भुवस्सुवरों
शम् । तमीशानं जगत स्तस्थुषस्पतिम् । धियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृधे । रक्षिता पायुरदब्धस्स्वस्तये ॥

शं भूर्भुवस्सुवः ईशानाय त्रिशूलहस्ताय भूताधिपतये वृषभवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
ईशानदिग्भागे नाभिस्थाने ईशानः सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.८॥

ॐ भूर्भुवस्सुवरों
खम् । अस्मे रुद्रा मेहना पर्वतासो वृत्रहत्ये भर हूतौ सजोषाः ।
यश्शंसते स्तुवते धायि पज्र इन्द्रज्येष्ठा अस्मां अवन्तु देवाः ॥

खं भूर्भुवस्सुवः ब्रह्मणे पद्महस्ताय विद्याधिपतये हंसवाहनाय सांगाय
सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः ।
ऊर्ध्वदिग्भागे मूर्धस्थाने ब्रह्मा सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.९॥

ॐ भूर्भुवस्सुवरों
ह्रीम् । स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः ॥
ह्रीं भूर्भुवस्सुवः विष्णवे चक्रहस्ताय लोकाधिपतये गरुडवाहनाय सांगाय सायुधाय सशक्ति परिवाराय सर्वालंकारभूषिताय उमामहेश्वर पार्षदाय नमः । अधोदिग्भागे पादस्थाने विष्णुस्सुप्रीतो सुप्रसन्नो वरदो भवतु ॥ ५.१०॥

॥ षोडशांग रौद्रीकरणम् ॥ ॥ ६॥

ॐ भूर्भुवस्सुवः । ॐ अम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
विभूरसि प्रवाहणो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
अं ॐ भूर्भुवस्सुवरों शिखास्थाने रुद्राय नमः ॥ ६.१॥

ॐ भूर्भुवस्सुवः । ॐ आम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
वह्निरसि हव्यवाहनो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
आं ॐ भूर्भुवस्सुवरों शिरस्थाने रुद्राय नमः ॥ ६.२॥

ॐ भूर्भुवस्सुवः । ॐ इम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
श्वात्रोसि प्रचेताः रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
इं ॐ भूर्भुवस्सुवरों मूर्धस्थाने रुद्राय नमः ॥ ६.३॥

ॐ भूर्भुवस्सुवः । ॐ ईम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
तुथोसि विश्ववेदा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥
ईं ॐ भूर्भुवस्सुवरों ललाटस्थाने रुद्राय नमः ॥ ६.४॥

ॐ भूर्भुवस्सुवः । ॐ उम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

उशिगसिकवी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

उं ॐ भूर्भुवस्सुवरों भ्रूस्थाने रुद्राय नमः ॥ ६.५॥

ॐ भूर्भुवस्सुवः । ॐ ऊम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

अंघारिरसि बंभारी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ऊं ॐ भूर्भुवस्सुवरों मुखस्थाने रुद्राय नमः ॥ ६.६॥

ॐ भूर्भुवस्सुवः । ॐ ऋम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

अवस्युरसि दुवस्वान् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ऋं ॐ भूर्भुवस्सुवरों कण्ठस्थाने रुद्राय नमः ॥ ६.७॥

ॐ भूर्भुवस्सुवः । ॐ ॠम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

शुन्ध्युरसि मार्जालीयो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ॠं ॐ भूर्भुवस्सुवरों बाहुस्थाने रुद्राय नमः ॥ ६.८॥

ॐ भूर्भुवस्सुवः । ॐ ऌम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

सम्राडसि कृशानू रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ऌं ॐ भूर्भुवस्सुवरों ऊरुस्थाने रुद्राय नमः ॥ ६.९॥

ॐ भूर्भुवस्सुवः । ॐ ॡम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

परिषद्योसि पवमानी रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ॡं ॐ भूर्भुवस्सुवरों हृदयस्थाने रुद्राय नमः ॥ ६.१०॥

ॐ भूर्भुवस्सुवः । ॐ एम् । नमश्शंभवे च मयोभवे च

नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

प्रतक्वासि नभस्वान् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

एं ॐ भूर्भुवस्सुवरों नाभिस्थाने रुद्राय नमः ॥ ६.११॥

ॐ भूर्भुवस्सुवः । ॐ ऐम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
असंमृष्टोसि हव्यसूदो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ऐं ॐ भूर्भुवस्सुवरों कटिस्थाने रुद्राय नमः ॥ ६.१२॥

ॐ भूर्भुवस्सुवः । ॐ ओम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
ऋतधामासि सुव ज्योंति रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

ॐ ॐ भूर्भुवस्सुवरों ऊरुस्थाने रुद्राय नमः ॥ ६.१३॥

ॐ भूर्भुवस्सुवः । ॐ औम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
ब्रह्मज्योतिरसि सुव र्धामा रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

औं ॐ भूर्भुवस्सुवरों जानुस्थाने रुद्राय नमः ॥ ६.१४॥

ॐ भूर्भुवस्सुवः । ॐ अम् । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
अजोस्येकपात् रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

अं ॐ भूर्भुवस्सुवरों जंघास्थाने रुद्राय नमः ॥ ६.१५॥

ॐ भूर्भुवस्सुवः । ॐ अः । नमश्शंभवे च मयोभवे च
नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥
अहिरसि बुध्नियो रौद्रेणानीकेन पाहि माऽग्ने पिपृहि मा मा मा हिꣳसीः ॥

अः ॐ भूर्भुवस्सुवरों पादस्थाने रुद्राय नमः ॥ ६.१६॥

त्वगस्थिगतैः सर्वपापैः प्रमुच्यते । सर्वभूतेष्वपराजितो भवति ।
ततो भूतप्रेत पिशाच ब्रह्मराक्षस यक्ष यमदूत शाकिनी डाकिनी
सर्प श्वापद वृश्चिक तस्कराद्युपद्रवाद्युपघाताः ।
सर्वे ज्वलन्तं पश्यन्तु । मां रक्षन्तु । सर्वान् महा जनान् रक्षन्तु ॥ ६.१७॥

The mahanyasam is a part of the methodology of chanting of the rudram on special occasions such as a mahArudram. Typically, during a Shri Rudra pArAyaNam at home, one recites the laghunyAsam. Such a Shri Rudra pArAyaNam in a public place of worship such as a temple is preceeded by the recital of the mahAnyAsam. As the name difference indicates, the laghunyAsam is much shorter. The mahAnyAsam invokes the deity of Shri Rudra in His many forms of Indra, Agni, Yama, Varuna etc in the different limbs (anga's) of the one who chants. Such an invoking is done to seek the blessings of the Lord, and at the same time giving one and all a feeling of immediate presence of the Lord in the vicinity of the chanting. The mahAnyAsam has certain sections of the Shri Rudram, the Purusha suktam etc repeated in it. The Shiva samkalpam is also part of this.

Note : guhyAdi mastakanta ShaDanganyasa, AtmarakShA (optional),
shivasaMkalpam, purushasuktam, uttaranarayanam apratiratham,
pratipUruSha-anuvAka, and tvamagne anuvAka – all these are part of
mahAnyAsaM, which makes the above text about 50

Encoded with Accents and proofread by
Vaidya Sundaram
Reproofread by KS Ramachandran

*mahAnyAsam*
pdf was typeset on March 20, 2025

Please send corrections to *sanskrit@cheerful.com*